…गोविन्दप्रारम्भः ॥

[illegible] संसर्गी मेघश्यामोऽतिसुन्दरः ॥१॥ इह कविः प्रतीप्सितग्रन्थ [illegible] निर्विघ्नपरिस
[illegible] लं तावद् [illegible] रति ॥१॥ मेघैर्मेदु [illegible] राधामाधवयोः रहःकेलयो यमुनाकूले जयन्तीत्यन्वयः रा
[illegible] कर्षेण वर्तन्ते कल्पभूतयोः राधामाधवयोः प्रत्यध्वकुंजद्रुमं अध्वनि मार्गे कुंजे
[illegible] तयोः यद्वा अध्वकुंजद्रुमान् प्रत्युद्दिश्य चलितयोरिनी तिकिं हे राधे अम्बरं आका

[illegible] नमम्बरः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ॥ ॥१॥
[illegible] प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥१॥ ॥

[illegible] द्रुमैस्तमालवृक्षैः श्यामाः अयं कृष्णः नक्तं रात्रौ भीरुः भयशीलोऽस्ति बालत्वात् तस्मात्
[illegible] गृहं नय एवं प्रकारेण नन्दस्यादेशस्सन् विश्वासभावः सूचितः ॥१॥ इदानीं कविः पर
[illegible] देवता स्मरणं कर्तुमाह ॥

सु॰व॰ २ रायादिनावच्छेदसहानुकूलाशक्तिर्नापूर्यते उत्तेजकेन मण्याद्यपसारणेऽभ्युपगम्यते इति कल्प्यते एवं शाक्तरूपमप्यतिरि
रिक्तः पदार्थः तद्भिन्नपदस्कपदार्थेष्वेतद्भवति सामान्येपि सत्त्वात् यथा गोत्वं तथाश्वत्वम् ५ पो नि... दृश्यप्रतीतेः ना
प्युभावे सत्त्वेन प्रतीयमानत्वादिति चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रतिस्वातंत्र्ये मण्याद्यभावादेर्वैक व॰२
ल्पेते अनेनैव सामञ्जस्येऽनन्तशक्तिःस्वप्रागभावध्वंसकल्पनानौचित्यात् नचोत्तेजके सति प्र... देधकसङ्गावेपि कथं
दाहइति वाच्यं उत्तेजकाभावविशिष्टमण्यभावस्य हेतुत्वात् एवं शाक्तरूपमपि न पदार्थान्तरं किंतु तद्भिन्नत्वे सति तज्
तन्यो धर्मवत्त्वं यथा चंद्रभिन्नत्वे सति चंद्राह्लादकत्वादि मुखे चंद्रशाक्तरूपं इति २ द्रव्याणि विभजते नित्यतेजो
मरुद्व्योमकालदिगात्ममनः द्रव्याणि क्षितिः पृथिवी आपो जलानि तेजो वह्न्यादि मरुद्वायुर्व्योम आकाशं
देही आत्मा दिक्कालमनांसि एतानि नव द्रव्याणीत्यर्थः ननु द्रव्यत्वजातौ किं मानं न हि तत्र प्रत्यक्षं प्रमाणं घृतजतुन
भलिषु द्रव्यत्वाग्रहात् इति चेन्न कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य चासमवायिकारणतान
वच्छेदकतया द्रव्यत्वसिद्धेरिति ननु दृश्यमद्रव्यं तमः कुतो नोक्तं तद्धि प्रत्यक्षेण गृह्यते तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च
द्रव्यत्वं तच्चि गंधशून्यत्वान्न पृथिवी नीलरूपवत्त्वाच्च न जलादिकं तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुःकारणमि
ति चेन्न आवश्यकतेजोऽभावेनोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् रूपवत्ताप्रतीतिर्भ्रमरूपा एवं कर्मवत्ताप्र राम
तीतिरपि आलोकापसरणौपाधिकी अतिरिक्तत्वे तमसो अतिरिक्तत्वे अनन्तावयवादिकल्पनागौरवं स्यात् सुवर्णस्य यथा २

मिष्टापत्तेः विघ्न ... प्रं कयातदाचरणात् तथैव शिष्टाचारात् नच तस्य निष्फलत्वेन बोधकवेदाप्रामाण्यापत्तिः
सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् अत एव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेपि न तद्बोधकवे
दाप्रामाण्यापत्तिः मंगलं तु विघ्नध्वंसविशेषे कारणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः क्वचिद्विघ्नात्यं
ताभाव एव समाप्तिसाधनं प्रतिबंधकसंसर्गाभावस्यैव कार्यजनकत्वात् इत्थं च नास्तिककारितग्रंथे जन्मांत
रीयमंगलजन्यदुरितध्वंसः स्वतः सिद्धविघ्नात्यंताभावो वास्तीति न व्यभिचारः इत्याहुः संसार एव महीरुहो दृ
ढस्तस्य बीजाय निमित्तकारणायेत्यर्थः एतेन ईश्वरे प्रमाणं दर्शितं भवति तथाहि यथा घटादिकार्यं कर्तृजन्यं
तथा क्षित्यंकुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां संभवत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः न च शरीराजन्यत्वेन कर्त्रज
न्यसाधकेन सत्प्रतिपक्ष इति वाच्यम् अप्रयोजकत्वात् ममनुक ... त्वेन कार्यत्वेन च कार्यकारणभाव एवानुकूलस्त
र्कः द्यावाभूमी जनयन् देव एकः विश्वस्य कर्ता भुवनस्य गोप्ता इत्याद्यागमा अप्यनुसंधेयाः द्रव्यं गुणास्तथा कर्म
सामान्यं सविशेषकं समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः २ सप्तानामभावत्वकथनादेव भावत्वं प्राप्तं ते
न भावत्वेन पृथगुपन्यासो न कृतः एते च पदार्था वैशेषिकप्रसिद्धाः नैयायिकानामप्यविरुद्धाः प्रतिपादितं चैवमेवाभ्यु
पगमेन अतएव चिंतामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वमाशंकितं ननु कथमेते पदार्थाः शक्तिसा
दृश्यादीनामप्यतिरिक्तपदार्थत्वात् तथाहि मण्यादिसमवहिते न वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते तत्र म

मु॰ व॰ नेऽस्यः यदपेक्षया विशेषो नास्तीत्यर्थः घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः परमाणूनां परस्परभेदको विशेष ए-
३ व स तु स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः समवायं दर्शयति घटादीनां कपालादौ द्रव्येषु गु-
णकर्मणोः तेषु जातेश्च संबंधः समवायः प्रकीर्तितः १० अवयवावयविनोर्जातिव्यक्त्योः गुणगुणिनोः क्रियाक्रियावतोर्नि-
त्यद्रव्यविशेषयोश्च यः संबंधः स समवायः समवायत्वं नित्यसंबंधत्वं न च प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणवि-
शेष्यसंबंधविषया विशिष्टबुद्धित्वात् दंडी पुरुष इति विशिष्टबुद्धिवत् इत्यनुमानेन संयोगादिबाधात्समवायसंबंधसिद्धिः
न च स्वरूपसंबंधेन सिद्धसाधनमर्थान्तरं वा अनेकस्वरूपाणां संबंधकल्पने गौरवात् लाघवादेकसमवायसिद्धिः न च स- त॰ ६
मवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसंगः तत्र रूपसमवायसत्त्वेऽपि रूपाभावात् न चैवमभावस्यापि वैशिष्ट्यं संबंधान्तरं सिध्ये-
दिति वाच्यं तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसंगात् घटाभावस्य तत्र सत्त्वात्तस्य च नित्यत्वात् अन्यथा
देशान्तरेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात् मम तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः वैशिष्ट्य-
स्यानित्यत्वेऽनन्तवैशिष्ट्यकल्पनेन तवैव गौरवं एवं च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां संबंधः अभावं विभजते अ-
भावस्तु इति अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वं संसर्गेति संसर्गाभावान्योन्या-
स्य॰ २ भावभेदात् इत्यर्थः अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात्संसर्गाभावं विभजते प्रागभाव इति प्रागभावस्तथा ध्वंसोऽप्य- राम॰
त्यन्ताभाव एव च एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते १२ संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वं अन्योन्याभावत्वं ३

रूपरसगंधस्पर्शाः परिमाणी निपृथक्त्वसंयोगविभागौ परत्वापरत्व बुद्धयः सुखदुःखेच्छा । द्वेषप्रयत्नाश्चेति सूत्रं = ३

तेजस्यृतभावित्वस्थावद्यन्ते गुणान्विभजते अथ गुणा रूपं रसो गंधस्ततः परं ३ स्पर्शः संख्या परिमितिः पृथक्त्वंच
ततः परं संयोगश्च विभागश्च परत्वं चापरत्वकं ४ बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकं द्रवत्वं स्नेहसंस्कारावदृष्टं
शब्द एव च ५ अमी एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कण्ठतः शब्दतः प्रदर्शिताः तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते कर्मा
णि विभजते उत्क्षेपणमिति उत्क्षेपणं ततोपक्षेपणमाकुंचनं तथा प्रसारणं च गमनं कर्माण्येतानि पंच च ६ कर्मत्वजातिः प्रत्यक्षसि
द्धा एवमुत्क्षेपणत्वादिकमपि ननु भ्रमणादिकमपि कर्मान्तरं कथं नोक्तमत आह भ्रमणमिति भ्रमणं रेचनं स्पंद
नोर्ध्वज्वलनमेव च तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ७ सामान्यं निरूपयति सामान्यमिति सामान्यं द्विविधं प्रोक्तं परं चापरमेव
च द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ८ तल्लक्षणं नित्यत्वे सत्यनेकसमवेतत्वम् अनेकसमवेतत्वं संयोगादीनामप्य
स्त्यत उक्तं नित्यत्वे सतीति समवेतत्वं गगनपरिमाणादावप्यस्ति अत उक्तमनेकेति नित्यत्वे सत्यनेकवृत्तित्वं अत्यंताभावेप्य
स्त्यतो वृत्ति सामान्यं विहाय समवेतेत्युक्तम् एकस्य व्यक्तिमात्रवृत्तिस्तु जातिर्न तथा चोक्तं व्यक्तेरभेदस्तुल्यत्वं संकरोथानव
स्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः द्रव्यादीति परत्वमधिकदेशवृत्तित्वं अपरत्वमल्पदेशवृत्तित्वं सकलजात्यपेक्ष
याधिकदेशवृत्तित्वात्सत्तायाः परत्वं तदपेक्षया चान्येषां जातीनामपरत्वं परभिन्नाया जातेरेव परतयोच्यते द्रव्यत्वादिकजाति
स्तु परापरतयोच्यते ९ व्यापकत्वात्परापि स्याद् व्याप्यत्वादपरापि च पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात्परत्वं स
त्ताद्यपेक्षया व्याप्यत्वादल्पदेशवृत्तित्वादपरत्वं द्रव्यादेः विशेषं निरूपयति अंत्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः अंते अवसा
ने वर्तते इत्यंत्यः यदपेक्षया विशेषो नास्तीत्यर्थः घटादीनां द्व्यणुकपर्यन्तानां अवयवभेदात्परस्परं भेदः परमाणूनां परस्परभे
दको विशेष एव स इत्यर्थः नित्यद्रव्यवृत्तिरिति [illegible] विशेषस्य परस्परमपि भेदः स्वत एव

स्वसमानाधिकरण भेदप्रतियोगितानवच्छेदकं = सत्ता भिन्नजातिसमा नाधिकरण संताभावप्रति योगित्वं परत्वं = स्वसमानाधिकरण त्यन्ताभावप्रतियो गित्वं = स्वसमानाधि करणभेदप्रतियो गितावच्छेदकं वा परत्वं = ४ =

परस्परात्यंताभावसमानाधिकरणयोर्धर्मयो रेकत्र समावेशः संकरः यथा भूतत्वमूर्तत्वयोः [illegible] साम्यं रूपस्य लक्षणहानि सामान्यभिन्नत्वे सति समवेतत्वे सत्यत्यंताभावप्रतियोगित्वं सामान्यरहितत्वरूपलक्षणहानिः विशेषत्वरूपजातेरितरव्यावर्तकत्वात् विशेषस्य स्वतो व्यावृत्तत्वरूपहानिः संबंधः अभावत्वं न जातिः असंबंधात् सदस
भेदः साश्रयव्यतिरिक्तैकाश्रयत्वं यथा आकाशत्वादिः तुल्यत्वमन्यूनानतिरिक्तदेशवृत्तित्वं यथा घटत्वकलशत्वादिः

नभा१ समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं तु फलितोऽर्थः तेन नित्यद्रव्येषु समवेतत्वाभावेऽपि नाव्याप्तिः त्रुटिः१
नो।५
मु·व· धात्वं सत्तावन्त इति सत्तावत्त्वं तत्त्वं यस्यास्तथा गुणादि निर्गुणाः क्रियाः द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः गुणादिरिति यद्यपि
४॥ गुणक्रियाशून्यत्वं समवायसम्बन्धेन घटादावव्याप्तं क्रियाशून्यत्वं गगनादावतिव्याप्तं तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदा
र्थविभाजकोपाधिमत्त्वं तदर्थः न हि घटत्वादिकं द्रव्यत्वादिकं वा गुणवदवृत्ति क्रियावदवृत्ति चेति किंतु गुणत्वादिकं तथा आका
शत्वादिकं तु न पदार्थविभाजकोपाधिः सामान्यरहितः सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः २४ सामान्यानधिकरणत्वं सा
मान्यादीनामित्यर्थः पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतं पारिमाण्डल्यमणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः अणुप
रिमाणं न कस्यापि कारणं तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् तच्च न संभवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरि
नर७ माणजनकत्वनियमात् महदारब्धस्य महत्त्ववदणुजन्यस्याणुतरत्वप्रसङ्गात् एवं परममहत्परिमाणमतीन्द्रियसामा
न्यविशेषाश्च बोध्याः इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं ज्ञायमानसामान्यं न प्रत्यासत्तिः ज्ञायमानं लिङ्गं नानुमि
4 तिकरणं इत्यभिप्रायेणोक्तं आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्य कारणत्वं परममहत्परिमाणमाकाशादेर्वो ध्वस्य नो।५
तस्यापि न कारणत्वमित्याचार्याणामाशयः इत्यन्ये तन्न ज्ञानातिरिक्तं प्रति अकारणताया एवाचार्यैरुक्तत्वात् ननु का
रणत्वं किमत आह अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितं २५ तस्य कारणस्य
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वं २६ यत्समवेतं कार्यं राम
भवति ज्ञेयं तत्समवायिकारणं तत्र तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् २७ समवायिकारणे प्रत्यासन्नं कार ४

तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं विनाश्यभावत्वं प्रागभावत्वं जन्याभावत्वं ध्वंसत्वं नित्यसंसर्गाभावत्वमत्यंताभा ता१
वत्वं यत्र तु भूतला द्घटादिकमपसारितं पुनरानीतं तत्र घटकालस्य संबंधाघटकतयात्यंताभावस्य नित्यत्वेपि घटकालेनघ
टात्यंताभावप्रतीतिः नव्यास्तु विनाशशाली चतुर्थो भाव इति केचित् अत्र ध्वंसप्रागभावाधिकरणेनात्यंताभाव इति प्राचां
मतं श्यामघटे रक्तं नास्ति रक्तघटे श्यामं नास्ति धीश्च प्रागभावध्वंसे चावगाहते ननु तदत्यंताभावे तयोर्विरोधात् नव्यास्तु तत्र विरो
धे मानाभावे ध्वंसावच्छेदे न घटात्यंताभावो वर्तते इत्याहुः ननु तत्र अभावानामधिकरणात्मकत्वं लाघवादिति चेन्न अनंताधि
क त्व६ करणात्मकल्पनापेक्षया ऽतिरिक्तकल्पनाया एव लघीयस्त्वात् एवं चाधाराधेयभावोप्युपपद्यते एवं तत्तत्कैवल्यधरसाद्यभावानां
तद२ तत्तदिंद्रियैः प्रत्यक्षत्वमुपपद्यते अन्यथा तत्तदधिकरणानां तत्तदिंद्रियाग्राह्यत्वात्प्रत्यक्षत्वं न स्यात् एवं न ज्ञानविशेषकालविशेषात्मक त
मभावस्य प्रत्युक्तं अप्रत्यक्षत्वापत्तेः इदानीं पदार्थानां साधर्म्यवैधर्म्ये वक्तुम् क्रमतेस तानाभिति समानानपि साद्दीवत्वादि धर्म१
कमुच्यते समानो धर्मो येषां ते सधर्माणस्तेषां भावः साधर्म्यं समानो धर्म इति फलितोर्थः एवं च विरुद्धो धर्मो येषां ते विधर्माणस्तेषां
भावो वैधर्म्यं विरुद्धो धर्म इति फलितोर्थः अथ त्वे ज्ञानविषयता सा च सर्वत्रास्ति ईश्वरज्ञानविषयताया केवलान्वयित्वात् एवं म
भिधेयत्वं प्रमेयत्वादिकं बोध्यं द्रव्येति द्रव्यादयः पंचमा वा अनेके समवायिनः स द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यं अने१
कत्वं समवायित्वं यद्यपि अनेकत्वमभावेप्यस्ति तथाप्यनेकत्वे सति भाववत्त्वं तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं फलि
तोर्थः प्रत्येकं घटादावाकाशादौ चनाव्याप्तिः समवायित्वं समवायसंबंधेन संबंधित्वं ननु समवायित्वे सामान्यादा व४१
अभावस्याधिकरणातिरिक्तत्वे ...

मु॰क्ता॰ रूपनाशस्यरूपांतरस्यसत्वात् न्यायनयेघटादावपितत्सत्वात् लक्षणसमन्वयः मधुरस्तु रसस्तत्र गंधस्तु द्विवि
८ धोमतः २६ मधुकटुकषायादिभेदेन यः षड्विधोरसः सः पृथिव्यामेव जलेतुमधुर एवरसः अपि पूर्ववत् रसद्व
यवृत्तिद्रव्यत्वव्याप्यजातिमत्वे लक्षणार्थो बसे यः गंधस्त्विति द्विविध इति वस्तुस्थितिमात्रं नतु द्विविधगंधव
त्वमपि लक्षणं द्विविधत्वस्य व्यर्थत्वात् द्विविधं च सौरभ्यासौरभ्यभेदेन बोध्यं स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः तस्या,,
स्प४ पृथिव्याः अनुष्णाशीतस्पर्शवत्वे चायोवत्तेत इत्यत उक्तं पाकज इति इत्थं च पृथिव्याः स्पर्शो ऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तं त३.१५
वस्तुतस्तु पाकजस्पर्शमात्रं लक्षणं अधिकस्य वैयर्थ्यात् यद्यपि पाकजस्पर्शः घटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्ति
द्रव्यत्वव्याप्यजातिमत्वमर्थो बोध्यः नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा अनित्या तु तदन्या स्यात् सैवावयवयो
३७ गिनी सा पृथिवी द्विधा नित्यानित्या चेत्यर्थः अणुलक्षणा परमाणुरूपा नित्या तदन्या परमाणुभिन्ना पृथिवी द्व्यणु
कादि सर्वाप्यनित्येत्यर्थः सैव अनित्या पृथिव्येव अवयववतीत्यर्थः ननु अवयविनि किं मानं परमाणुपुंजैरेवो नचे पत्ते:४
वं परमाणूनामतीन्द्रियत्वात् घटादेः प्रत्यक्षत्वं न स्यात् इति वाच्यं एकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वा
त् यथा एकस्य केशस्य दूरे ऽप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वं न चैकं स्थूलो घट इति बुद्धेरनुपपत्तिः इति वाच्यं एम
एको महान् धान्यराशिरितिवदुपपत्तेः एवं परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात् दूरस्थकेशस्तु ८

पाषाणभस्मनि पृथिवी गंधवत्वा ते भस्मावयवाः पृथि वी समवायिकारणत्वा त् भस्मावयवाः पाषाण वयवा भिन्नाः पाषाण ध्वंसजन्यद्व्यारंभकत् पाषाणाः पृथिवीद्रव त्वे सति पृथिवी समवा यिकारणकत्वात् पा षाणगंधवान् पृथि वीत्वात् पाषाणभस्म पाषाणो पटो वत् यं भ

कालदिशोष्वद्रव्यत्वे चरेवं ३३ संख्यादयः पंचबुद्धीरिछायत्नो पि चैश्वरे परापरत्वे संख्यादि पंचवेगश्चमानसे ३४
वायोर्नवैकादश तेजसो गुणाजलक्षितिप्राणभूतां चतुर्दश्वादि कालघोः पंचषड्वचांबरमहेश्वरे सैमनसस्तथा
वेव च ३५ तेच संख्यादयः पंचवेन्याकोशेसाधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं निरूपयतत्राहि तिर्गंधहेतुनाना
रूपवती मता गंधहेतुरिति गंधसमवायिकारणमित्यर्थः यद्यपि गंधवत्वमात्रलक्षणमुचितं तथापि पृथिवीत्व
जातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं तथाहि पृथिवीत्वं गंधसमवायिकारणतावच्छेदकतया सिध्यति ग्रन्य
थागंधत्वावच्छिन्नस्याकस्मिकत्वापत्तेः न च पाषाणादौ गंधाभावाद्व्यवलक्षणमव्याप्तमिति वाच्यं तत्रापि गंध
सत्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्यते कथमन्यथा तद्भस्मनि गंधउपलभ्यते भस्मनो हि पाषाणध्वंसजन्य
त्वात् पाषाणोपादानोपादेयत्वं सिध्यति यच्च यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः दृष्टं चैतत्खंडपटेम त४ न ५
हापटध्वंसजन्ये इत्थं च पाषाणपरमाणौ पृथिवीत्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वं तथा च तस्य गंधवत्वे बाध
काभावः नानारूपेति शुक्लनीलादिभेदेन नानाजातीयरूपं पृथिव्यामेव वर्तते न तु जलादौ तत्र शुक्लस्यैव सत्वात्
पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात् न च नानारूपवत्त्वमेतल्लक्षणमव्याप्तिः रूपद्वयवद्वृत्तिद्रव्यत्वव्या
प्यजातिमत्त्वस्य रूपनाशावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात् वैशेषिकमते पृथिवीपरमाणौ

पाषाणध्वंसजन्यत्वात्खंडपटवत् ७ घटध्वंसजन्ये [illegible] व्यभिचारवारणाय द्वितीयं द्रव
पदं प्रतिबंधकद्रव्यासंतताभावजन्येद्रव्ये व्यभिचारवारणाय ध्वंसपदं ५ गंधत्वावच्छिन्नं प्रति पृथिवीत्वानंगीकारे ८

मु॰व॰ सितोवायुः आकाशंनिरूपयति आकाशस्यतुविशेषः शब्दोवैशेषिकोगुणः आकाशकालदिशामेकैकव्य
१३ क्तित्वात् आकाशत्वंनजातिः किंतु आकाशत्वंशब्दाश्रयत्वंवैशेषिकइतिकथनंतुविशेषगुणांतरव्यवच्छे
दाय एतेनप्रमाणमपिदर्शितंतथाहि शब्दोगुणश्चक्षुर्ग्रहणायोग्यबहिरिंद्रियग्राह्यजातिमत्वात् स्पर्शव
त् शब्दोद्रव्यसमवेतः गुणत्वात् संयोगवदित्यनुमानेनशब्दस्यद्रव्यसमवेतत्वेसिद्धे शब्दोनस्पर्शवद्विशेषगुणः
अग्निसंयोगासमवायिकारणकत्वाभावेसत्यकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् पाकजरूपादौव्यभि
चारवारणायसत्यंतं पटरूपादौव्यभिचारवारणायकारणगुणपूर्वकेतिजलपरमाणुरूपादौव्यभिचार
रा ५ वारणायप्रत्यक्षेति नदिक्कालमनसांगुणः विशेषगुणत्वात् रूपवत् नात्मविशेषगुणः बहिरिंद्रियग्राह्यत्वात्
6 रूपवत् इत्थंचशब्दाधिकरणंनवमंद्रव्यं गगनंनामकंसिध्यति नचवाय्ववयवेषुसूक्ष्मशब्दक्रमेणवायौ
कारणगुणपूर्वकउत्पद्यतामितिवाच्यं अपांबहुत्वभावित्वेनवायोर्विशेषगुणत्वाभावात् तत्रचशरीरस्य
विषयस्यचाभावात् इंद्रियंदर्शयति इंद्रियंतुभवेच्छ्रोत्रमेकःसन्नप्युपाधितः नन्वाकाशंलाघवादेकंसि रामः
द्धं श्रोत्रंतुपुरुषभेदाद्भिन्नंकथमाकाशंस्यादतआह आकाशःएकःसन्नपिउपाधिकर्णशष्कुलिभे १३
[illegible] नानात्वेनेत्यर्थः ॥८३

गो १

र्शादिलिंगकः सर्वेषां नित्यत्वाद्युक्तं देहव्यापित्वगादिकं ४४ अनुष्णाशीतस्पर्शपृथिव्यामपिसत्त्वादुक्तमपाकज
मिति अपाकजस्पर्शस्य जलादावपिसत्त्वादुक्तं अनुष्णाशीत इति एतेन वायौ विजातीयस्पर्शो दर्शितः तज्ज
न्यत्वावच्छेदकं वायुत्वमिति भावः एष वायुः स्पर्शादिलिंगकः वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते वि
जातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कंपेन च वायोरनुमानात् यथा च वायुर्न प्रत्यक्षः
स्तथाग्रे वक्ष्यते एवं रिति वायुर्द्विविधो नित्योनि त्यः परमाणुरूपो नित्यः तदन्योऽनित्यः अवयवसमवेतश्च सो
पि त्रिविधः शरीरेंद्रियविषयभेदात् तत्र शरीरमयोनिजं पिशाचादीनां परं तु जलीयतैजसवायवीयशरीरा
णां पार्थिवभागोपष्टंभकत्वात् उपभोगक्षमत्वं जलादीनां प्राधान्यं जलीयत्वादिकमिति अत्रयोविशे
षतमाह देहव्यापीति शरीरव्यापकं स्पर्शग्राहकमिंद्रियं त्वग्वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यं
जकत्वात् अंगसंगिसलिलशैत्याभिव्यंजकपवनवत् विषयं दर्शयति प्राणादिस्तु महावातपर्यंतो विषयो
मतः यद्यप्यनित्यो वायुश्चतुर्विधः तस्य चातुर्विध्यं प्राणादिरित्युक्तमाकरे तथापि संक्षेपाद्द्वैविध्यमुक्तं
प्राणस्त्वेक एव हृदादिनानास्थानवशात् मुखनिर्गमादिनानाक्रियाभेदाच्च नानासंज्ञां लभते इति पर्यव

भिन्नजलनिष्ठस्नेहस्यापिजन्यत्वं स्यादितिशेषः=५

मु. व. ज नाभ्यां विनाकस्यचिदुत्पत्तिरहितेनद्व्यणुकादिकं तु त्र्यणुकांतं सर्वमेव विषयो भवति शरीरेंद्रिय
१०. योर्विषयत्वेपि पुनः प्रकारांतरेणोपन्यासप्रयोजनं तु शिष्यबुद्धिवैशद्यार्थं जलं निरूपयति वर्णः शुक्लोरस
स्पर्शौ जलेस्य मधुरः शीतलो स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिध्यति यद्यपि स्ने
हत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यं न च परमाणौ जलत्वेन
स्यात् तत्र जन्यस्नेहाभावात् स्नेहस्य च नित्यस्य स्वरूपयोग्यत्वेपि फलावश्यंभावनियमात् इति चेन्न जन्यस्ने
हजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजा
तिसिद्धेः शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति ननु शुक्लरूपत्वलक्षणं अपवाने व ५
मितिकद्वृत्तवर्णवद्वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं अभा शुक्लेतररूपासमा
नाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमवातदर्थः तेन स्फटिकादौ नातिव्याप्तिः र
सस्पर्शाविति जलस्य मधुर एव रसः शीत एव स्पर्शः तिक्तरसवद्वृत्ति मधुरसवद्वृत्तिद्रव्यत्वसाक्षाद्व्या रा॰क॰
प्यजातिमत्त्वं तेन शर्करादौ नातिव्याप्तिः शीतेतरस्पर्शवद्वृत्ति शीतस्पर्शवद्वृत्तिजातिमत्त्वं तदर्थः १०

तेजस्त्वजलत्वपृथिवीत्वमध्यातिव्याप्त्यसंभवातिव्यारणायाद्युपदत्रयं=४

भूतशरीरे नेष्टः या अभावेनाव्याप्तेराह अथवेति = हस्तत्व घटत्वावारायत्र व्यत्वं चात्र हस्तघट द्रव्ये वर्तित्याप्तिवारणाय विशेषणत्रयं = ता दृष्टं पृथिवीत्वमादाय पृथिव्यादौ सभयादंत्यावय
वीषु लक्षणं तत्र आधेय द्रव्यत्वस्यान्त्येन घटत्वस्य प्रदासः = २ देवत्वं विहाय जलीयत्वं करकादौ तद्विहाय देवत्वं देवेषु तयोर्वरुणलोकस्य शरीरे संकरः तेजसेप्येवं = ३

अथवा चेष्टावद्वृत्त्यावयवि वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं वाच्यं अन्त्यावयवि मात्रवृत्ति चेष्टावद्वृत्ति जातिमत्त्वं वा तत्र मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः न च नृसिंहशरीरे कथं लक्षण समन्वयः तत्र नृसिंहत्वस्यैक व्यक्तिवृत्तितया जाति त्वाभावात् जलीयतैजसशरीरवृत्ति तया देवत्वस्यापि जातित्वाभावात् इति वाच्यं कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् इंद्रियमिति घ्राणेंद्रियं पार्थिवमित्यर्थः पार्थिवत्वं कथमिति चेदित्थं घ्राणेंद्रियं पार्थिवं रूपादिषु पंचसु मध्ये गंधस्यैवाभिव्यंजकत्वात् कुंकुमगंधाभिव्यंजकगोघृतवत् न च दृष्टा न्तस्य स्वकीयरूपाद्यभिव्यंजकत्वात् दृष्टान्तासिद्धिरिति वाच्यं परकीयरूपाद्यव्यंजकत्वस्य तदर्थत्वात् न च नवश रावगंधव्यंजकजलेनानैकान्तिकमिति वाच्यं तस्य सक्तुरसाभिव्यंजकत्वात् यद्वा परकीयेति न देयं वायूपनीतसुरभिभागस्य दृष्टान्तत्वसंभवात् न च घ्राणेंद्रियसन्निकर्षस्य गंधमात्रव्यंजकत्वात्तत्र व्यभिचार इति वाच्यं द्रव्यत्वे सतीति विशेषणात् विषय इति उपभोगसाधनं हि विषयः सर्वमेव हि कार्यजातमदृष्टाधीनं यत्कार्यं यददृष्टाधीनं तदुपभोगं साक्षात्परंपरया वा जनयत्येव न हि बीजप्रयो

मो२

मु.ब. द्रव्यं त्वचो गोचरः सोपि उद्भूतस्पर्शोपि स्पर्शत्वादिसहितः रूपान्यच्च रूपी योग्यं रूपमित्येतरूपत्व
१९ भिन्नं च यच्च रूपी योग्यं तत्त्वगिन्द्रियस्यापि ग्राह्यं तथा च पृथक्त्वसंख्यादयो ये च रूपी ग्राह्या गुणा
उक्ताः एवं क्रियाज्ञानं योग्यवृत्तयो त्वचो ग्राह्याः इत्यर्थः रूपमनापि कारणं द्रव्याध्यक्षे अत्रापि
त्वगिन्द्रियजन्यपि द्रव्यप्रत्यक्षे रूपं कारणं तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति नवी
नास्तु बहिर्द्रव्यप्रत्यक्षे न कारणं प्रमाणाभावात् किंतु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः
कारणं अन्वयव्यतिरेकात् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेन्न आत्मावृत्ति ि.।चतु६
शब्दभिन्न५ विशेषगुणवत्त्वं वा प्रयोजकमस्तु रूपस्य कारणत्वे लाघवमिति चेन्न वायोस्त्वगिन्द्रियेणाग्रहण
प्रसंगात् इष्टापत्तिरिति चेत् उद्भूतस्पर्शएव लाघवात् कारणमस्तु प्रभाया अप्रत्यक्षत्वे त्विष्टापत्ति
रेव किं न स्यात् तस्मात् प्रभां पश्यामीति वायुं स्पृशामीति प्रत्यक्षसत्त्वात् द्वयोरपि प्रत्यक्षत्वं भवत्येव
बहिर्द्रव्यप्रत्यक्षमात्रे तु न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरेकत्वं गृह्यत एवं कश्चिद्वित्वादि रामः
कमपि क्वचित्संख्यापरिमाणाद्यग्रहादोषादित्याहुः त्वचो योग इति त्वचो योगो मनसा ज्ञानकारणं १९

रूपत्वस्याविभजनात् न्यूनत्वं जन्यप्रत्यक्षत्वस्यैव निरूपणीयत्वात् उक्तसूत्रानुसारात् घ्राणस्य गोचरो
गंधो गंधत्वादिरपि स्मृतः गोचर इति ग्राह्य इत्यर्थः गंधत्वादिरित्यादिपदात्सुरभित्वादिपरिग्रहः गंध
स्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा गंधाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यं तथा रसो
रसज्ञायास्तथा शब्दोपि च श्रुतेः ५४ रसत्वादिसहितः इत्यर्थः तथा शब्दोपीति शब्दत्वादिसहितः गंधो र
सश्च उद्भूतो बोध्यः उद्भूतरूपमिति उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये विभागसं-
योगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तं ५५ क्रियां जातिं योग्यवृत्तिं समवायं च तादृशः ग्रीष्मोष्मादावनु- द.गा.६
द्भूतरूपमिति न प्रत्यक्षे तद्वंतीति उद्भूतरूपवंति योग्येति पृथक्त्वादिकमपि योग्यव्यक्तिवृत्ति बोध्यं ता-
दृशो योग्यवृत्तिरित्यर्थः चक्षुर्योग्यत्वमेव कथं तत्राह गृह्णातीति चक्षुः संबंधादालोकोद्भूतरूपयोः
५६ आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणं तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसंबंधे
न कारणत्वं द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः
प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेनेति उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि च त्वचः उद्भूतस्पर्शव-

मु॰व॰ प्रत्यक्षसिद्धः तदवच्छिन्नजनकतावच्छेदकमथैतदेवेति भावः तैलादावपिजलस्यैवस्नेहस्तैले
११ हप्रकर्षेणाच्चदहनानुकूल्यमितिवक्ष्यति नित्यतादिप्रथमवत् किंतुदेहमयोनिजं इंद्रियंरसनं १२
सिंधुहिमादिर्विषयोमतः ४१ प्रथमवदित्यर्थः तथाहिजलंद्विविधंनित्यमनित्यंचपरमाणुरूपं
नित्यं द्व्यणुकादिसर्वमनित्यमवयवसमवेतंच अनित्यमपित्रिविधंशरीरेंद्रियविषयभेदात् पृ
थिवीतोपोविशेषमाह किंत्विति अयोनिजमेवेत्यर्थः जलीयशरीरमयोनिजंवरुणलो
१६ केप्रसिद्धं इंद्रियंरसनंजलीयमित्यर्थः तथाहिरसनंजलीयंगंधाद्यव्यंजकत्वेसतिरसव्यंजक
त्वात् सक्तुरसाभिव्यंजकोदकवत् रसनसंनिकर्षेव्यभिचारवारणायद्रव्यत्वंदेयं विषयंदर्शय
तिसिंधुरितिसिंधुःसमुद्रः हिमंतुषारः आदिपदात्सरित्कासारकरकादिसर्वोपिग्राह्यः नचहिम
करक[illegible]योःकठिनत्वात्पार्थिवत्वमितिवाच्यं ऊष्मणाविलीनयो[illegible]स्तयोर्जलत्वसाधने
हसिद्धत्वात् यद्द्रव्यंयद्द्रव्यध्वंसजन्यमितिव्याप्तेःजलोपादानोपादेयत्वसिद्धिः अदृष्टविशेष रामः
णद्रवत्वप्रतिरोधात् करकायांकाठिन्यप्रत्ययस्यभ्रांतत्वात् तेजोनिरूपयतिउष्णस्पर्श ११

न च प्रभामण्डलगतभास्वररूपेणाभिभवात् विद्यमानस्यापि कालिन्दीकालिम्नः अनुपलब्धिरिति चेन्न नीलरूपं प्रति जलत्वस्य कारणतावच्छेदकत्वेन वियति प्रक्षिप्तकालिंदीजलनी
लिमोपलब्धिं प्रति प्रभामंडलरूपोपलब्धेः प्रतिबंधकताकल्पने गौरवात् =३

ननु शुक्लरूपमेवेति कुतः कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न नीलजनकतावच्छेदकं यः
पृथिवीत्वजातेरभावात् जले नीलरूपासंभवात् कालिंदीजले नीलत्वप्रतीतिस्त्वाश्रयोपाधिकी आंतिरिव
अत एव वियति प्रक्षिप्ते धवलिमोपलब्धिः अथ जलमाधुर्ये किं मानं न हि प्रत्यक्षेण कोपि रसस्तत्रा
नुभूयते न च नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं तस्याश्रयोपाधिकत्वादन्यथा जंबीर
करवीररसादावम्लोपलब्धेरम्लादिवत्वमपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जलरसव्यंजक
त६ त्वात् न च हरीतक्यामिव जलोष्णसंयोगाद्रसांतरोपलब्धिरिति वाच्यं कल्पनागौरवात् पृथिवीसं त६
म्लादिजनकतावच्छेदकत्वात् जलेनाम्लादिकं जंबीररसादौ त्वाश्रयोपाधिकी तथा प्रतीतिः एवं जन्य
शीतस्पर्शजनकतावच्छेदकं जन्यजलत्वं तदवच्छिन्नजनकतावच्छेदकं जलत्वं वा बोध्यं घृष्टचंदना
दौ शैत्योपलब्धिश्चंदनांतर्वर्तिशीततरसलिलस्यैवेति जलसंयोगात् जले उष्णत्वप्रतीतिरौपाधिक्येव
इतरत्र पाकासंभवात् स्नेहस्तत्र स्वर्णतुल्यासिद्धिकनदाहेतुः ४० घृताद्यावयितदं तद्वृत्तिजलस्यैव स्ने
हसमवायिकारणत्वात् तेन जल एव स्नेह इति मन्तव्यं द्रवत्वमिति सांसिद्धिकद्रवत्वत्वं जातिविशेषः

अथ यज्जरसाजनकस्य पृथिवीरसस्यापि संयोगसाचिव्यतदर्शनात् तदनंतरोत्पन्नजलसंयोगस्यैव पृथिवीरसोत्पादकत्वसौकर्यादेव तत्र सर्वकार्य
कारणभावस्य हरीतक्यामधुररसस्य कल्पने गौरवादित्यभिमानः =६